International Journal of Sanskrit Research 2019; 5(2): 16-21

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(2): 16-21
© 2019 IJSR
www.anantaajournal.com
Received: 14-01-2019
Accepted: 18-02-2019

**गोपाल आचार्यः**
सहकारी अध्यापकः,
संस्कृतविभागः सुभाषचन्द्र-वोस-सेन्टेनारी-महाविद्यालयः ,मुर्शिदावादः,
पश्चिमवङ्गः, भारतवर्षम्

# रोगविनिश्चये प्रमेहः - आयुर्वेदोक्तदिशा चिकित्सातत्त्वविमर्शः

**गोपाल आचार्यः**

**सारसंक्षेपः**
भारतवर्षस्य चिकित्साविज्ञानं प्राचीनकालादारभ्य समुन्नतिशिखरं समाकर्षति। अत्रकृते चिकित्साविज्ञाने आयुर्वेदोऽवदानं स्थापयति। रोगविनिश्चयं रोगचिकित्सानिर्धारणमेवायुर्वेदशिक्षाया मुख्योद्देश्यरूपेण भाति। रोगप्रशान्तिरेवास्य मुख्यप्रयोजनम्।अतो भारतवर्षस्य सर्वोत्कृष्टसम्पद्भेषजविद्या तथायुर्वेदशास्त्रम्। आधिव्याधिप्रपीडिते असारे संसारेऽस्मिन्विशेषतया प्रमेहव्याधिना प्रपीडितानां मानवानां संख्याधिकत्वमुत्तरं वृद्धिं प्राप्नोति। साम्प्रतं प्रायशः प्रत्येकंमानवाः स्वरोगस्यमूलतः उपशमनाय "एलोप्याथी"-औषधादिकं परित्यज्यायुर्वेदोक्तदिशा तत्तद्रोगस्य चिकित्सायै "होमिओप्याथी" औषधीनां सेवनमेव कुर्वन्ति पार्श्वप्रतिक्रियाया मुक्तेरितिहेतोर्बाहुल्येन। अत्र आयुर्वेदस्य श्रेयस्करत्वं प्रतिपादितमेव। केवलमायुर्वेदीयमूलकभेषजौषधसेवनेन पथ्यादिप्रयोगेन अस्मात् रोगात्चिरंनिर्मूलता सुस्थतरजीवनं च लभ्येते। अतः आयुर्वेदशास्त्रस्य विविधेषु कायचिकित्साप्रधानेषु ग्रन्थेषु स्थाने स्थाने प्राप्यमानेन "प्रमेह"-व्याधेः चिकित्साविषयकतत्त्वपर्यालोचनेन रोगादस्मात् आयुर्वेदप्राणातुराणां चिकित्सासिद्धये सहायतां सम्पादयिष्यति। इति शिवम्।

**संकेतशब्दाः** -
१.उपोत्घातः२.रोगाणांसमुत्पत्तिः३.रोगविनिश्चयेप्रमेहः४.आयुर्वेदीयचिकित्सायाःप्रासङ्गिकत्वम्

## ❖ उपक्रमणिका

भारतवर्षस्य चिकित्साविज्ञानं प्राचीनकालादारभ्य समुन्नतिशिखरं समाकर्षति। अत्रकृते चिकित्साविज्ञाने आयुर्वेदोऽवदानं स्थापयति। पञ्चसहस्राधिकवत्सरात् पूर्वं भारतवर्षे आयुर्वेदचिकित्साविज्ञानस्य बीजं परिव्याप्तम्। वैज्ञानिकगतदिशा वैदिकयुगादारभ्यायुर्वेदचिकित्साशास्त्रं परवर्तिनि कालेऽवैदिकयुगे तथा बौद्धिक-जैनिकयुगेऽपि तस्य चिकित्साधारणकौशलपद्धतिः समौज्वलस्य शिखरमावहति। किं नामायुर्वेद इति प्रश्नस्य निरसने उच्यते - हितायुरहितायुर्सुखायुर्दुःखायुश्चेत्येतेषां चतुर्विधानामायूषां सम्यक् परिचयेण सह तेषां हिताहितविषयः परिमाणं स्वरूपञ्च यस्मिन् शास्त्रे कथितमस्ति तदेव शास्त्रमायुर्वेद इत्युच्यते । तदुक्तम –

" हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥" [1] इति।

पुनश्चापि उच्यते यस्मात्शास्त्रेऽस्मिन् आयुर्विद्यमानोऽस्ति, शास्त्रेनानेन वा आयुर्विषयकज्ञानं सम्भवति तस्मादेतद्ज्ञानमायुर्वेद इत्युच्यते।

"आयुरस्मिन् विद्यते अनेन वा

आयुर्विन्दतीत्यायुर्वेदः।"[2] इति।

आयुषो हिताय एव चिकित्सात्र विधीयते। अतो दीर्घायुलाभाय नीरोगशरीरकामनार्थञ्च सर्वलोकहितकरमायुर्वृद्धिकारकमायुर्वेदशास्त्रमेव सततं काङ्खितमिति।

शरीरं सत्त्वश्चेति व्याधीनामारोग्यानाञ्चाश्रयस्थानं कथ्यते। तथोक्तम्-

"शरीरं सत्त्वसंज्ञश्च व्याधीनामाश्रयो मतः।"[3] इति।

शरीरं सत्त्वश्च समाश्रित्य विविधानां रोगाणां समुत्पत्तिः।तत्र कालवुद्धीन्द्रियार्थानामयोगः, मिथ्यायोगोऽतियोगश्च व्याधीनां मूलमुत्तमं कारणम्। रोगस्तुदोषाणां वैषम्यावस्था। दोषसाम्यन्तु आरोग्यमित्युच्यते।[4] के च ते दोषाः? कुपितवायुपित्तश्लेष्माणश्च शारीरदोषा इति कथ्यन्ते।ते एव देहसम्भवहेतवः।तेषां स्वयमेव परिमाणं गुणं कार्यञ्च वर्तन्ते।तेषामविकृतत्वे दैहिककार्याणां यथायथसिद्धिः समाप्रति, साम्यावस्था च विधीयते। परन्तुपरिमाणगुणकर्माणां वा वृद्धिक्षयमात्रेण विकृतमयावस्थां ते सृजन्ति। तेषां विकृतत्वेन धातोरावासस्थानं दूषयन्ति इति दोषाः कथ्यन्ते।

"वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः।

विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति॥"[5] इति।

रस-रुधिर-मांस-मेदोऽस्तिमज्ज-शुक्रानि धातव इति प्रथन्ते।एते सप्तधातवः स्वयं स्थित्वा मनुष्याणां देहं धारयति।अतो धातुरित्युच्यते। दोषत्रयेण दूषितत्वात् एते धातवः "सप्तदुष्या" इत्यपि कथ्यन्ते।कफः पित्तं मूत्रं मलः प्रस्वेदः नखलोमश्च रसरक्तादिसप्तधातूनां मला इति कथ्यन्ते। किञ्च कार्यं मलानां, उच्यते- दैहिकशक्तिरक्षणमेव प्रधानं कार्यं मलानां, दैहिकाद्रताया अपणयं मूत्राणां, स्वेदस्य च दैहिकाद्रताया धारणम्। दोषधातुमलाः सदा मूलं देहस्य।एतेषां दोषधातुमलानामसाम्यावस्था देहे मनसि च रोगान्सृजति।

### ❖ दोषाणामसाम्यनिदानम्

अत्यधिकपरिश्रमं, रतिक्रियाधिकम्, अत्यध्ययनम्, अविरतभ्रमणं, रात्रिजागरणं, रुधिरक्षरणम्, अतिभयम्, अतिशोकम्, आघातोऽधिकतया, कटू-तिक्त-कषाय-रसयुक्तद्रव्यभक्षणं, शुष्कमांसभक्षणम्, अतीवमात्रयान्न – मुग – मसुर – मटर –शिम-भक्षणमुपवासानियतखाद्यग्रहणं, मलमूत्रवेगधारणं चेत्यवशाद्वायुः प्रकुपितः स्यात्क्रोध-शोक-भयात्यधिकपरिश्रमसाध्यकार्योपवासाधिकमैथुनैः अत्यधिककटूवम्ललवणरसयुक्त -खाद्यग्रहणोष्णद्रव्य –मत्स्य – दध्यम्लफलभक्षणैःच पित्तस्य दूषणं भवेत्। दिवानिद्रा – श्रमाभाव – गुरुपाकभोजन – पायसगुडजातद्रव्यभक्षणैः जलजप्राणीनां मांसभक्षणतालनारिकेलादि-मधुरफलभक्षणाच्च कफस्य प्रकुपितत्त्वं जातं भवेत्।तेषां प्रकुपितत्रिदोषाणां लक्षणप्रकाशनमेव "रोग"-नाम्ना प्रथते।आयुर्वेदशास्त्रे तेषां व्याधीनां कथं संप्राप्तिर्भवेत्, किं तावल्लक्षणं व्याधीनां, कथं वा तेषां साधारणचिकित्साविधिरनुस्मृता, तदुपशमनाय औषध – पथ्यादिप्रयोगविधिरिति विधृताः।आधिव्याधिप्रपीडिते असारे संसारेऽस्मिन्प्रमेहव्याधिना प्रपीडितानां मानवानां संख्याधिकत्वमुत्तरं वृद्धिं प्राप्नोति।केवलमायुर्वेदीयमूलकभेषजौषधसेवनेन पथ्यादि प्रयोगेन अस्मात्रोगात्चिरं निर्मूलता सुस्थजीवनं च लभ्येते।[6] तेषु विविधेषु व्याधिषु आयुर्वेदशास्त्रानुसारेण प्रमेहव्याधेः भेषजालोचना सन्दर्भेऽस्मिन्विध्रीयते सुललितभाषया यथार्थतया च आयुर्वेदशास्त्रचिकित्सापद्धत्यनुसारम्।

### ❖ रोगविनिश्चये प्रमेहः

**प्रमेहसंप्राप्तिः**

निदानदोषदूष्याणां दुर्वलतया असम्पूर्णरूपेण वा संयोगानुवद्धत्वं यथा रोगानुत्पादयति तथैव तेषां सम्पूर्णतया अनुवद्धत्वं सर्वलक्षणयुक्तान्रोगान्सृजति। वायु-पित्त-कफरूपत्रिदोषाः प्रकुपिताः सन्तः मेदमांसमज्जाशुक्ररसादिसप्तधातून्प्रदूष्य वस्तिप्रदेशं मूत्राशयं वाक्राम्य मूत्रञ्च प्रदूष्य स्वस्वलक्षणाक्रान्तं प्रमेहरोगमुत्पादयति।

**प्रमेहस्थानम्**

मूत्राशये एव प्रमेहस्यावस्थितिर्वर्तते।

**प्रमेहनिदानम्**

वायु-पित्त-कफानां प्रकुपितत्वे आयुर्वेदे प्रमेहत्रितयस्योल्लेखः प्राप्यते। ते च कफजनितप्रमेहः पित्तजनितप्रमेहः वायुजनितप्रमेहश्चेति।

**श्लेष्मजप्रमेहनिदानम्**

यव –चीन –कोदनैषध –मुकुन्द –कमहाव्रीह्यादिसुगन्धकानां नवान्नानामतिप्रमाणेन भक्षणं, ग्राम्यानूपौदकानाञ्च मांसानां, शाकतिलपललपिष्टान्नपायसकृशरेक्षुविकाराणां, क्षीर-दधि-मधुरद्रव्याणाञ्चात्युपयोगः, निश्चिन्ततयाउपवेशननिद्रा-शयनजनितसुखानुभवः, श्लेष्ममेदमूत्राणां वर्द्धकाविहिताहारविहारौ च सर्वे श्लेष्मजप्रमेहनिदानविशेषाः। इत्थं शरीरस्थं मेदः मांसं क्लेदञ्च प्रदूष्य वस्तिगतं च प्रदाय कफजनितप्रमेहस्योत्पत्तिः।

**पित्तजप्रमेहनिदानम्**

उष्णाम्ल –लवण –क्षार -कटूकाजीर्णद्रव्यसेवनादिकारणात्, अतितीक्ष्णातपाग्निसन्ताप –परिश्रम-क्रोध-विषमाहाराणामाचरणात्प्रकुपितं पित्तं मेदः मांसं क्लेदश्च प्रदूष्य वस्तिश्च समुपेत्य पैत्तिकप्रमेहां विसृजति।

**वातजप्रमेहनिदानम्**

पित्त-कफरूपदोषद्वयस्य क्षीणत्वे जाते कषाय-कटू-तिक्त-रुक्ष-लघु-शीतलान्नपानात्, मैथुनपरिश्रम-वमनविरेचनास्थापनानां क्रियाणामतियोगात्, मलमूत्रवेगधारणात्, उपवासाभिघातातपोद्वेगशोकरक्तस्राव - रात्रिजागरण-विषमशरीरन्यासानामाचरणात्प्रकुपितवायुः वसामज्जालसिकोजनामकान्धातून् अवकृष्य वस्तिस्थानानयनपूर्वकात्प्रदूष्य च वातिकप्रमेहमुत्पादयति।

**प्रमेहस्य संख्या**

त्रिदोषप्रकोपात्शरीरे विंशतिसंख्यकाः प्रमेहा समुत्पन्ना भवन्ति। यथा श्वेतपीतलोहितकृष्णश्यामाश्चेति पञ्चानां वर्णानां न्यूनाधिक्यसंयोगविशेषात्कपिलादिवर्णानां समुत्पत्तिः, तथैववायु-पित्त-कफरूपदोषाणां मेद-रक्त-शुक्र-वसा-लसीका-मज्ज-रस- ओजः -मांसरूपदूष्याणां पदार्थानामुत्कर्षापकर्षभेदात्संयोगविशेषाच्च मुत्रस्य वर्णभेदो जायते। तद्भेदानुसारमेव प्रमेहस्य संख्याभेदो जायते।तेषु विंशतिप्रकारेषु प्रमेहेषु श्लेष्मजप्रमेहस्तावत्दशविधः। ते च उदकमेहः इक्षुप्रमेहः सान्द्रप्रसादमेहः सुरामेहः शुक्लमेहः शुक्रमेहः शीतमेहः सिकतामेहः शनैर्मेहः आलालमेहश्चेति।पित्तप्रमेहः खलुषड्विधः। ते च क्षारमेहः कालमेहः नीलमेहः लोहितमेहः माञ्जिष्ठमेहः हारिद्रमेहश्चेति। वातजनितप्रमेहश्चतुर्विधः। ते च वसामेहः मज्जमेहः ह्स्तिमेहः मधुमेहश्चेति।साकल्येन विंशतिप्रकारप्रमेहा आयुर्वेदे प्रोक्ताः।

**प्रमेहस्य लक्षणम्**

आयुर्वेदशास्त्रानुसारं विपाकीयरोगस्तावत्प्रमेहः। प्रमेहकोपवशात्शरीरे शर्करायाः विपाकक्रिया विघ्निता स्यात्। अस्मात्प्रभावात् रक्तशर्करायाः उच्चमात्रा प्रवहति शरीरे। येन शरीरस्य स्वाभाविकक्रिया विघ्निता भवेत्। किं तावत्लक्षणं प्रमेहस्येति प्रश्नस्य निरसने कथ्यते- यतः प्रमेहस्य संस्थितिः वर्तते मूत्राशये, अतः मूत्रस्य परिमाणाधिक्यम् आविलवर्णता चेति लक्षणद्वयं सममेव प्रमेहे परिलक्ष्यते।[7]

**प्रमेहपूर्वरूपम्**

प्रमेहातुरस्य कतिपया उपशमाः परिलक्ष्यन्ते। केशेषु जटिलीभावः, मुखे मधुरास्वादभावः, हस्तपादयोः दाहभावः, मुखतालुकण्ठशोषम्, अत्यधिकपिपासा, आलस्यभावः, मलसञ्चयंशरीरे, कायछिद्रेषुमललिप्तता, सर्वाङ्गेषुप्रदाहः, षट्पद-पिपीलिकाभिश्च शरीरमूत्राभिसरणम्, अङ्गगन्धः, निद्रातन्द्राभावः, स्वेदः, शिथिलाङ्गभावः, केशनखातिवृद्धिः, शीतप्रियत्वश्चेति प्रमेहस्य पूर्वलक्षणानि।

**प्रमेहस्योपद्रवाः**

बहुकालं व्याप्य स्थिते प्रमेहे, तृष्णा ज्वरातिसारो दाहो दुर्वलता रुचिःपूतिमांसजपिडकापरिपाकोऽलजीविद्रध्यादयश्च उपद्रवाः समवेता भवेयुः।

**प्रमेहरोगचिकित्सा**

अनिष्टकारकास्वास्थ्यकराहारविहाराणां येषामपप्रयोगेन त्रिदोषाणां साम्यता विघ्निता स्यात् तदेव कारणमवसाम्यभिषजां चिकित्सा आयुर्वेदशास्त्रे विधेया। चिकित्सकाः कृशदुर्वलप्रमेहिने वृंहणं तथा पुष्टिसाध्यं बलमांसवृद्धिकारकमौषधं प्रयच्छेयुः, स्थूलबलशालिने प्रमेहिने च संशोधनेन तथा वमनविरेचनादिभिः चिकित्सां प्रकुर्वन्ति। प्रमेहोपशमनाय आयुर्वेदः प्राकृतिकभेषजं चिकित्साविधानार्थं प्रददाति। प्राकृतिकभेषजां विविधानि गुणान्यत्र क्रियां कुर्वन्ति।शनैःशनैः तेषां भेषजगुणानि शरीरे शर्करायाः साधारणविपाकस्य प्रभूतोन्नतिं साधयन्ति। प्रमेहोपशमनार्थं तेषां भेषजगुणानि निम्ने प्रदत्तानि-

**श्लेष्मजप्रमेहे भेषजसंग्रहः**

**कषायप्रयोगः**

हरितकी-कट्फल-मुथा-लोध्रानां, पाठाविडङ्गार्जुन-धन्वनां, हरिद्रा-दारुहरिद्रा- तगरपादुकाविडङ्गानां, कदम्ब-शालार्जुनदीप्यकानां, दारुहरिद्राविडङ्गखदिरधवानां, देवदारु - कुडागुरु - रक्तचन्दनानां, दारुहरिद्राग्निमन्थ-त्रिफलासपाठानां, पाठमूर्वागोक्षुराणां, यव-हरितकी-गुलञ्चानां, जम्वुछाल-हरितकी-चिता-सप्तपर्णानाञ्च दशविधानां कषायाणां मधुसम्प्रयुक्ताः प्रयोगा दशविधान्श्लेष्मजप्रमेहान्निवारयन्ति।

**पित्तजप्रमेहे भेषजसंग्रहः**

**कषायप्रयोगः**

लोध्रार्जुनोशीरचन्दनानाम्, उशीर-मुस्तामलकि-हरितकीनां, पटोलनिम्वामलकगुडचीनां, मुस्ता-हरितकी-पद्मकवृक्षकाणां, लोध्रदारुहरिद्राधातकीनां, निम्वार्जुन-हरिद्राम्रात-नीलोत्पलानाञ्च षड्विधानां कषायानां मधुसम्प्रयुक्ताः प्रयोगाः क्षारमेह-रक्तमेह-नीलमेहादीन्षड्विधान्पित्तप्रमेहान्निवारयन्ति।

**वातजप्रमेहे भेषजसंग्रहः**

**कषायचूर्णप्रयोगः**

गुलञ्चवल्लिकषायेण आकणादिकुटजकटकीतिक्ताकुष्ठञ्च संचूर्ण्य पानात् वातजसर्पिमेहे उपशमः। सुपारिमेदयोः मधुसम्पृक्तं कषायं क्षौद्रमेहं मधुमेहं वा प्रशमति।

**सर्वप्रमेहे भेषजसंग्रहः**

सर्वेषामेव प्रमेहानामुपशमनाय मधुना सह अथवा हरिद्राचूर्णेन सह आमलकीफलानां रसेन सह वा दारुहरिद्रा-देवदारु-त्रिफला-मुस्तासमूदायानां काषाययोगमुत्पाद्य पेयम्। एतेन श्लेष्मज-पित्तज-वातज-प्रमेहेभ्यश्च निवृत्तिलाभः। पित्त-श्लेष्मजमेहे कम्पिल्लसप्तच्छदशालज-वैभीत-रोहितक-कुटज-कपित्थपुष्पाणि च विचूर्ण्य क्षौद्रेण सह लेहनं कृत्वा सेवनीयानि।हरितकी-कट्फल-मुस्त-लोध्रकु-चन्दनानां निर्मितकषायस्य मधुना हरिद्राचूर्णेन वा प्रक्षेपणं कृत्वा पानात्वात-श्लेष्मजप्रमेहयोः विनष्टीकरणं सम्भवेत्।त्रिफला-देवदारु-दारुहरिद्रा-मुस्तसमूदयानां कषायं गुलञ्चानां वा सरसः मधुना सह पानेन सर्वप्रमेहानां विनाशं साधयति।आमलकीफलानां रसस्य त्रिफला-देवदारु-मुस्तकैर्वा कृतकषायस्य मधु-हरिद्राचूर्णाभ्यां पानात्सर्वमेहाः प्रनष्टा जाताः।शर्करया सह पलाशपुष्पं विचूर्ण्य शीतलजलेन सह सेवनेन प्रमेहो विनश्यति। यतः स्वास्थ्यमेवाभीप्सितम्, अतोऽस्वस्थ्यमानवः स्वास्थ्यं लभते येनोपायेन, सर्वदैव भिषक् तदेवोपायमवलम्वते। यैः हेतुभिः ये मेहाः प्रभवन्ति, तेषु प्रमेहेषु तानि कारणानि निषिद्धानि। यतः रोगस्य निदानपरिवर्जनं रोगस्य चिकित्सारूपेण विहितम् ।

"हेतोरसेवा विहिता यथैव ।
जातस्य रोगस्य भवेच्चिकित्सा॥" [8] इति।

**प्रमेहे पथ्यापथ्यविधयः**

**प्रमेहे पथ्यविधयः**

उपवासः, वमनानि, विरेचनानि, उद्वर्त्तनं, कङ्ग –यव –वेणु -कोरदूष-श्यामाक-वोरो-मुकन्दकधान्यतण्डुलाः, गोधूमशालिकमलाधान्यतण्डुलाः, कुलथ्थकलायमुगाडहरच्छोलायूषाः, तिलाः,लाजाः,पुरातनसुरा, पुरातनमधु, यवमण्डः, तक्रं, रासभमूत्रं, महिषमूत्रं, कपोत-शशक-तित्तिर-मयूर- शुकदिजाङ्गलानां भक्षणं, सजिना-पटोल-करला-ताल-वृहती-यज्ञडुमुर-लशुन-मोचादिभक्षणं,शालिञ्च-गोक्षुर-मूषिकपर्णि - शाकखादनं, मन्दारपत्र – त्रिफला – कपित्थ – जम्वु - केशर-कमोलोत्पल-कन्दवीज-खर्ज्जुरभक्षणं, तिक्त-कषायद्रव्यभक्षणं, रौद्रसेवनं, हस्त्यश्ववाहनेनातिभ्रमणं व्यायामचर्चाभ्यासश्चेति प्रमेहरोगे उत्तमपथ्यद्रव्यरूपेण प्रथते।

**प्रमेहे अपथ्यविधयः**

मूत्रवेगधारणं, धूम्रपानं, स्वेदं, शोणितमोक्षणं, सदोपवेशनं, दिवानिद्रा, नवधान्यान्नानि, दधीनि, अनूपदेशजातमांसं, पिष्टान्नानि, मैथुनं, सुरापानं, तैल-दुग्ध-घृत-गुड-तालास्थिमज्जानकुष्माण्डेक्षु-दूषिताम्वुमधुराम्ललवणादिद्रव्याणां ग्रहणञ्च प्रमेही यत्नेन परिवर्जयेत्।

**प्रमेहपिडकाः**

**प्रमेहपिडकानां भेदाः**

प्रमेहस्योपेक्षयादस्य मांसलेषु मर्मषु सन्धिषु च स्थानेषु कष्टसमाः सप्त पिडका जायन्ते। ते च पिडका यथा शराविका कच्छपिका जालिनी सर्षपी अलजी विनता विद्रधी च।

**प्रमेहपिडकानां लक्षणानि संस्थितिश्च**

अन्तोन्नता मध्यनिम्ना स्रावा-क्लेदयुक्ता वेदनासमन्विता शरावाकृतियुक्ता पिडका एव शराविका इत्युच्यते । कूर्मवदाकृतिसमन्विता गभीरवेदनायुक्ता सदाहा पिडका कच्छपिकानाम्ना विधीयते। मांसजालसमावृता तीव्रदाहा सूक्ष्मछिद्रसमायुक्ता भवति जालिनी पिडका।भवेत्पिडका सर्षपी नातिमहती तीव्रदाहसमायुक्ता सर्पपाभिः क्षुद्रपिडकाभिश्चाभिनिश्चिता। तृष्ण-मोहज्वरान्विता-स्फोटकव्याप्तातिक्लेशदायका पिडका एवालजी।पिडकायामस्यां चर्म प्रज्वलति, देहभागश्च दहत्यग्निरिव। नीला पृष्ठे उदरे वापि उद्भूता वेदनात्मका क्लेदयुक्ता पिडका एव विनता। दुष्टरक्तातिमात्रत्वादतिवेदनासंयुक्ता विद्रधिपिडका वाह्याभ्यन्तरभेदात्दिविधा। छेदनवत्यन्त्रणा प्रतीयते पिडकायामस्याम्। वाह्यविद्रधिपिडका त्वक्-स्नायु-मांसोथ्था। हृदये यकृति प्लीहि कुक्षौ वक्षस्थले नाभिदेशे, रङ्क्षणयो वस्तिस्थाने वा तीव्रवेदनासंयुक्ताया विद्रधिपिडकायाः समुत्पत्तिः।

**प्रमेहपिडकानामुपद्रवाः**

प्रभूतश्लेष्ममेदसः ह्यतिवलाः शराविका कच्छपिका जालिनी चेति दुःसहा पिडका जायन्ते। पित्तप्रधानाल्पमेदसः सर्षपी -अलजी-विनता-विद्रधी चेति चिकित्सासाध्यपिडका जायन्ते। तृष्णा श्वासः मांसपचनं मोहः हिक्का मत्तता ज्वरो विपर्पो मर्म्मस्थानसंरिधश्चेति उपद्रवा जायन्ते पिडकानाम्।

**प्रमेहपिडकानामुपशमाः**

अतः प्रमेहीनां याः पिडकाः समुत्पद्यमाना भवन्ति,शल्यविद्भिः कुशिलवैः चिकित्सकैः शस्त्रेण संशोधनरोपणैश्च पिडकानां चिकित्सा कर्तव्या। एतेन प्रमेहपिडका उपशमा भवन्ति।

साम्प्रतं प्रायशः प्रत्येकं मानवाः स्वरोगस्य मूलतः समुपशमनाय "एलोप्याथी"-औषधादिकं परित्यज्यायुर्वेदोक्तदिशा तत्तद्रोगस्य चिकित्सायै "होमिओप्याथी" औषधीनां सेवनमेव कुर्वन्ति पार्श्वप्रतिक्रियाया मुक्तेरिति हेतोर्बाहुल्येन। अत्र आयुर्वेदस्य श्रेयस्करत्वं प्रतिपादितमेव। अद्यतनचिकित्साविज्ञाने शुश्रूषागारनिर्माणकथा, भिषक्-द्रव्य-रोगी-उपस्थाता-भेषजपादचतुष्टयकल्पना, औषधागारपरिकल्पना इत्यादीनि विविधानि कार्याणि प्राचीनायुर्वेदचिकित्साविज्ञानमपेक्षन्ते। प्रत्येकं चिकित्सापद्धत्यामायुर्वेदस्य प्रभावोऽनस्वीकरणीयः। सुस्वास्थ्यविधानार्थं स्वस्वास्थ्यविधेः प्रयोजनं वर्तते।

तत्प्रयोजनसिद्धये आयुर्वेदोपदेशा अवश्यमेव स्मरणीयाः। आयुर्वेदीयदीनचर्चा मनुष्याणां जीवने प्रशान्तिमानयति। शारीरिक-मानसिकगतदिशा जनानां सुस्वास्थ्यस्य परिणमत्वं भवेदनया आयुर्वेदीयदीनचर्चया। चित्तस्य प्रशान्तये तथेन्द्रियाणां संयमनाय चायुर्वेदशास्त्रं सततमेव सात्म्येन्द्रियार्थसंयोग-सत्कर्मणां सम्यक् प्रयत्नमुपदिशति। एतेनारोग्यविधानं सत्वरं सम्भवेत्। आयुर्वेदीयोपदेशोऽयमाधुनिकजीवने मानवैरेकान्ततया सदाचारनियमपालनपूर्वकं पालनीयः। तेन तेषामेव सुस्वास्थ्यसम्भावना समधिकतया वर्धत इत्यत्र किं चित्रम् ? अतस्तैः शास्त्रोदिरितसदाचारनियमाः सदैव पालनीयाः स्वेषां हिताय। "मङ्गलाचारशीलः",..........."सर्वप्राणिषु वन्धुभूतः स्यात्।" "क्रुद्धानामनुमेता भीतानामाश्वासयिता।""दीनानामभ्युपपत्ता।". .........."नानृतंब्रूयात्।""नान्यस्वमादद्यात्।"......"नान्यदोषान्ब्रु यात्।" "नान्यरहस्यमागमयेत्।" [९] -इत्यादि-वचनान्युपदेशतया जीवने पालनियावश्यकत्वेन भजन्ते। नेदं साम्प्रतिकं किमपि नूतनं तत्त्वमपि तु अद्यतः प्रायः द्विसहस्रवर्षेभ्यः प्राक् चरकाचार्येण प्रमेहरुजः औषधत्वेन संयमिता जीवनचर्या एवोपदिष्टेति तदीयं वैशिष्ट्यम्। अलमतिविस्तरेण।

## ❖ तथ्यसूत्राणि

1. चरकसंहिता, ( सम्पा. ) व्रजेन्द्रचन्द्रनागः, सूत्रस्थानम्, प्रथमोऽध्यायः, पृष्ठे ३९
2. सुश्रुतसंहिता (महर्षिसुश्रुतविरचिता), (अनूदितम्) यशोदानन्दनसरकारः, सूत्रस्थानम्, प्रथमोऽध्यायः, पृष्ठे ३९
3. चरकसंहिता, ( सम्पा. ) व्रजेन्द्रचन्द्रनागः, सूत्रस्थानम्, प्रथमोऽध्यायः, पृष्ठे ५३
4. "विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।" चरकसंहिता, (सम्पा.) व्रजेन्द्रचन्द्रनागः, सूत्रस्थानम्, नवमोऽध्यायः, पृष्ठे ८९
   पुनश्च, " रोगस्तु दोषवैषम्यं, दोषसाम्यमरोगता"
   अष्टाङ्गहृदयम्(वाग्भटप्रणीतम्),(अनूदितम्)के.आर्.श्रीकान्त-मूर्तिः, प्रथमखण्डम्, सूत्रस्थानम्, प्रथमोऽध्यायः ।
5. तत्रैव ।
6. न केवलमौषधसेवनेन, न वा भिषक्-गुणेनैव व्याधीनां प्रशमनं सम्भवेत्। चतुर्णां विषयाणां समन्वयसाधनेनैव व्याधीनामारोग्यविधानं सम्भवति। अत आयुर्वेदशास्त्रे चिकित्सायाः पादचतुष्टयं कल्पितम्। ते च पादा भिषक् द्रव्यमुपस्थाता रोगी चेति। एतेषां चतुष्टयानां पादानां यथायथगुणेनैव विविधानां रोगाणां प्रशमनं भवति।
   " भिषग्-द्रव्यमुपस्थाता रोगीपादचतुष्टयम्।
   गुणवत् कारणं ज्ञेयं विकारस्योपशान्तये॥"
   चरकसंहिता, (सम्पा.) व्रजेन्द्रचन्द्रनागः, सूत्रस्थानम्, नवमोऽध्यायः, पृष्ठे ८९
7. "सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता" आयुर्वेदसंग्रहः (अनूदितम्) देवेन्द्रनाथ –सेनगुप्तः उपेन्द्रनाथ-सेनगुप्तः, तृतीयखण्डम्, प्रमेहरोगाधिकारः
8. चरकसंहिता, (सम्पा.) व्रजेन्द्रचन्द्रनागः, चिकित्सास्थानम्, षष्ठोऽध्यायः, पृष्ठे ५०
9. चरकसंहिता, (सम्पा.) व्रजेन्द्रचन्द्रनागः, सूत्रस्थानम्, अष्टमोऽध्यायः, पृष्ठे ८०-८१

## ❖ परिशीलिता ग्रन्थानुक्रमणी


**क) संस्कृतभाषानिबद्धा आकरग्रन्थततयः-**

1. अष्टाङ्गहृदयम्- (वाग्भटप्रणीतम्)- प्रथमखण्डम्, (अनूदितम्) के.आर. श्रीकान्त-मूर्तिः, चौखम्वा-कृष्णदास-एकाडेमी, वाराणसी, २००७(आङ्गलाब्दः), पुनःमुद्रितम्।
2. चरकसंहिता-(सम्पा.) व्रजेन्द्रचन्द्रनागः, नवपत्रप्रकाशनम्, कलिकाता, १९८४ (आङ्गलाब्दः), प्रथमप्रकाशनम्।
3. निदानम्- (माधव-कर-विरचितम्), (अनूदितम्) उपेन्द्रनाथः सेनगुप्तो देवेन्द्रनाथः सेनगुप्तश्च, दीपायनप्रकाशनी, १३००(वङ्गाव्दः), प्रथमप्रकाशनम्।
4. सुश्रुतसंहिता (महर्षिसुश्रुतविरचिता)- (अनूदितम्) यशोदानन्दनसरकारः, कलिकाता, १३१८(वङ्गाब्दः), द्वितीयसंस्करणम्।

**ख) संस्कृतभाषानिबद्धाःसहायकग्रन्थाः**

1. आयुर्वेदसंग्रहः- (अनूदितम्) देवेन्द्रनाथःसेनगुप्तःउपेन्द्रनाथःसेनगुप्तश्च, (सम्पा.) कालीकिङ्कर-सेनशर्मासत्यशेखर-भट्टाचार्यश्च, दीपायनप्रकाशनम्, कलिकाता, १९९९ (आङ्गलाब्दः), प्रथमप्रकाशनम्।

**ग) वङ्गभाषानिबद्धाः सहायकग्रन्थाः-**

1. पाल, अमल कुमार- संकट चिकित्सा ओ पुनरुज्जीवन, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९८८(ख्री.)।
2. सेनगुप्त देवेन्द्रनाथ, सेनगुप्त उपेन्द्रनाथ, आयुर्वेद-प्रदीप(सम्पा.) वजेन्द्रचन्द्र नाग, नवपत्रप्रकाशन, कलिकाता, १९८० (आङ्गलाब्द), प्रथमप्रकाश।